# Chapter 5

## कर्मसन्न्यासयोग

## *karmasannyāsayoga*

| | |
|---|---|
| अर्जुन उवाच | *arjuna uvāca* |
| सन्न्यासं कर्मणां कृष्ण | *sannyāsaṁ karmaṇāṁ kṛṣṇa* |
| पुनर्योगं च शंससि। | *punaryogaṁ ca śaṁsasi,* |
| यच्छ्रेय एतयोरेकं | *yacchreya etayorekaṁ* |
| तन्मे ब्रूहि सुनिश्चितम्।।१।। | *tanme brūhi suniścitam.* (1) |
| श्रीभगवानुवाच | *śrībhagavānuvāca* |
| सन्न्यासः कर्मयोगश्च | *sannyāsaḥ karmayogaśca* |
| निःश्रेयसकरावुभौ। | *niḥśreyasakarāvubhau,* |
| तयोस्तु कर्मसन्न्यासात् | *tayostu karmasannyāsāt* |
| कर्मयोगो विशिष्यते।।२।। | *karmayogo viśiṣyate.* (2) |
| ज्ञेयः स नित्यसन्न्यासी | *jñeyaḥ sa nityasannyāsī* |
| यो न द्वेष्टि न काङ्क्षति। | *yo na dveṣṭi na kāṅkṣati,* |
| निर्द्वन्द्वो हि महाबाहो | *nirdvandvo hi mahābāho* |
| सुखं बन्धात्प्रमुच्यते।।३।। | *sukhaṁ bandhātpramucyate.* (3) |
| साङ्ख्ययोगौ पृथग्बालाः | *sāṅkhyayogau pṛthagbālāḥ* |
| प्रवदन्ति न पण्डिताः। | *pravadanti na paṇḍitāḥ,* |
| एकमप्यास्थितः सम्यक् | *ekamapyāsthitaḥ samyak* |
| उभयोर्विन्दते फलम्।।४।। | *ubhayorvindate phalam.* (4) |

यत्साङ्ख्यैः प्राप्यते स्थानं
तद्योगैरपि गम्यते।
एकं साङ्ख्यं च योगं च
यः पश्यति स पश्यति।।५।।

*yatsāṅkhyaiḥ prāpyate sthānaṁ*
*tadyogairapi gamyate,*
*ekaṁ sāṅkhyaṁ ca yogaṁ ca*
*yaḥ paśyati sa paśyati.* (5)

सन्न्यासस्तु महाबाहो
दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म
नचिरेणाधिगच्छति।।६।।

*sannyāsastu mahābāho*
*duḥkhamāptumayogataḥ,*
*yogayukto munirbrahma*
*nacireṇādhigacchati.* (6)

योगयुक्तो विशुद्धात्मा
विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा
कुर्वन्नपि न लिप्यते।।७।।

*yogayukto viśuddhātmā*
*vijitātmā jitendriyaḥ,*
*sarvabhūtātmabhūtātmā*
*kurvannapi na lipyate.* (7)

नैव किञ्चित्करोमीति
युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्
अश्नन्गच्छन्स्वपञ्श्वसन्।।८।।

*naiva kiñcitkaromīti*
*yukto manyeta tattvavit,*
*paśyañśṛṇvanspṛśañjighran*
*aśnangacchansvapañśvasan.* (8)

प्रलपन्विसृजन्गृह्णन्
उन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु
वर्तन्त इति धारयन्।।९।।

*pralapanvisṛjangṛhṇan*
*unmiṣannimiṣannapi,*
*indriyāṇīndriyārtheṣu*
*vartanta iti dhārayan.* (9)

ब्रह्मण्याधाय कर्माणि
सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन
पद्मपत्रमिवाम्भसा।।१०।।

*brahmaṇyādhāya karmāṇi*
*saṅgaṁ tyaktvā karoti yaḥ,*
*lipyate na sa pāpena*
*padmapatramivāmbhasā.* (10)

| | |
|---|---|
| कायेन मनसा बुद्ध्या | *kāyena manasā buddhyā* |
| केवलैरिन्द्रियैरपि। | *kevalairindriyairapi,* |
| योगिनः कर्म कुर्वन्ति | *yoginaḥ karma kurvanti* |
| सङ्गं त्यक्त्वात्मशुद्धये।।११।। | *saṅgaṁ tyaktvātmaśuddhaye.* (11) |
| युक्तः कर्मफलं त्यक्त्वा | *yuktaḥ karmaphalaṁ tyaktvā* |
| शान्तिमाप्नोति नैष्ठिकीम्। | *śāntimāpnoti naiṣṭhikīm,* |
| अयुक्तः कामकारेण | *ayuktaḥ kāmakāreṇa* |
| फले सक्तो निबध्यते।।१२।। | *phale sakto nibadhyate.* (12) |
| सर्वकर्माणि मनसा | *sarvakarmāṇi manasā* |
| सन्न्यस्यास्ते सुखं वशी। | *sannyasyāste sukhaṁ vaśī,* |
| नवद्वारे पुरे देही | *navadvāre pure dehī* |
| नैव कुर्वन्न कारयन्।।१३।। | *naive kurvanna kārayan.* (13) |
| न कर्तृत्वं न कर्माणि | *na kartṛtvaṁ na karmāṇi* |
| लोकस्य सृजति प्रभुः। | *lokasya sṛjati prabhuḥ,* |
| न कर्मफलसंयोगं | *na karmaphalasaṁyogaṁ* |
| स्वभावस्तु प्रवर्तते।।१४।। | *svabhāvastu pravartate.* (14) |
| नादत्ते कस्यचित्पापं | *nādatte kasyacitpāpaṁ* |
| न चैव सुकृतं विभुः। | *na caiva sukṛtaṁ vibhuḥ,* |
| अज्ञानेनावृतं ज्ञानं | *ajñānenāvṛtaṁ jñānaṁ* |
| तेन मुह्यन्ति जन्तवः।।१५।। | *tena muhyanti jantavaḥ.* (15) |
| ज्ञानेन तु तदज्ञानं | *jñānena tu tadajñānaṁ* |
| येषां नाशितमात्मनः। | *yesāṁ nāśitamātmanaḥ,* |
| तेषामादित्यवज्ज्ञानं | *teṣāmādityavajjñānaṁ* |
| प्रकाशयति तत्परम्।।१६।। | *prakāśayati tatparam.* (16) |

तद्बुद्धयस्तदात्मानः
तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं
ज्ञाननिर्धूतकल्मषाः।।१७।।

*tadbuddhayastadātmānaḥ*
*tanniṣṭhāstatparāyaṇāḥ,*
*gacchantyapunarāvṛttiṁ*
*jñānanirdhūtakalmaṣāḥ.* (17)

विद्याविनयसम्पन्ने
ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च
पण्डिताः समदर्शिनः।।१८।।

*vidyāvinayasampanne*
*brāhmaṇe gavi hastini,*
*śuni caiva śvapāke ca*
*paṇḍitāḥ samadarśinaḥ.* (18)

इहैव तैर्जितः सर्गः
येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म
तस्माद्ब्रह्मणि ते स्थिताः।।१९।।

*ihaiva tairjitaḥ sargaḥ*
*yeṣāṁ sāmye sthitaṁ manaḥ,*
*nirdoṣaṁ hi samaṁ brahma*
*tasmādbrahmaṇi te sthitāḥ.* (19)

न प्रहृष्येत्प्रियं प्राप्य
नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसम्मूढः
ब्रह्मविद् ब्रह्मणि स्थितः।।२०।।

*na prahṛṣyetpriyaṁ prāpya*
*nodvijetprāpya cāpriyam,*
*sthirabuddhirasammūḍhaḥ*
*brahmavid brahmaṇi sthitaḥ.* (20)

बाह्यस्पर्शेष्वसक्तात्मा
विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा
सुखमक्षयमश्नुते।।२१।।

*bāhyasparśeṣvasaktātmā*
*vindatyātmani yatsukham,*
*sa brahmayogayuktātmā*
*sukhamakṣayamaśnute.* (21)

ये हि संस्पर्शजा भोगाः
दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय
न तेषु रमते बुधः।।२२।।

*ye hi saṁsparśajā bhogāḥ*
*duḥkhayonaya eva te,*
*ādyantavantaḥ kaunteya*
*na teṣu ramate budhaḥ.* (22)

शक्नोतीहैव यः सोढुं
प्राक्शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं
स युक्तः स सुखी नरः।।२३।।

*śaknotīhaiva yaḥ soḍhuṁ*
*prākśarīravimokṣaṇāt,*
*kāmakrodhodbhavaṁ vegaṁ*
*sa yuktaḥ sa sukhī naraḥ.* (23)

योऽन्तःसुखोऽन्तरारामः
तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं
ब्रह्मभूतोऽधिगच्छति।।२४।।

*yo'ntaḥsukho'ntarārāmaḥ*
*tathāntarjyotireva yaḥ,*
*sa yogī brahmanirvāṇaṁ*
*brahmabhūto'dhigacchati.* (24)

लभन्ते ब्रह्मनिर्वाणम्
ऋषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः
सर्वभूतहिते रताः।।२५।।

*labhante brahmanirvāṇam*
*ṛṣayaḥ kṣīṇakalmaṣāḥ,*
*chinnadvaidhā yatātmānaḥ*
*sarvabhūtahite ratāḥ.* (25)

कामक्रोधवियुक्तानां
यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्वाणं
वर्तते विदितात्मनाम्।।२६।।

*kāmakrodhaviyuktānāṁ*
*yatīnāṁ yatacetasām,*
*abhito brahmanirvāṇaṁ*
*vartate viditātmanām.* (26)

स्पर्शान्कृत्वा बहिर्बाह्यान्
चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा
नासाभ्यन्तरचारिणौ।।२७।।

*sparśānkṛtvā bahirbāhyān*
*cakṣuścaivāntare bhruvoḥ,*
*prāṇāpānau samau kṛtvā*
*nāsābhyantaracāriṇau.* (27)

यतेन्द्रियमनोबुद्धिः
मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधः
यः सदा मुक्त एव सः।।२८।।

*yatendriyamanobuddhiḥ*
*munirmokṣaparāyaṇaḥ,*
*vigatecchābhayakrodhaḥ*
*yaḥ sadā mukta eva saḥ.* (28)

भोक्तारं यज्ञतपसां
सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां
ज्ञात्वा मां शान्तिमृच्छति।।२९।।

*bhoktāraṁ yajñatapasāṁ*
*sarvalokamaheśvaram,*
*suhṛdaṁ sarvabhūtānāṁ*
*jñātvā māṁ śāntimṛcchati.* (29)

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः।।५।।

*om tatsat iti śrīmadbhagavadgītasu upaniṣatsu*
*brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde*
*karmasannyāsayogo nāma pañcamo'dhyāyaḥ.* (5)